International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2024; 1(2): 30-32
© 2024 IJMH
www.themultijournal.com
Received: 21-06-2024
Accepted: 24-06-2024
Publish : 29-06-2024

**जया मनराल नेगी**
शोधच्छात्रा,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतवि-श्वविद्यालय,नई दिल्ली

**Correspondence:**
**जया मनराल नेगी**
शोधच्छात्रा,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतवि-श्वविद्यालय,नई दिल्ली

# विशिष्टाद्वैतमते जीवस्वरूपविमर्शः

**जया मनराल नेगी**

**सारांश**

विशिष्टाद्वैतवेदान्तः एकादशशताब्द्याः महता दार्शनिकेन रामानुजाचार्येण पादिताभारतीयदर्शनस्यैका महत्त्वपूर्णा शाखा वर्तते या ब्रह्मजीवजगताम्मध्ये विशिष्टाद्वैतसिद्धान्तं स्थापयति।अस्मिन् शोधपत्रे वयं विशिष्टाद्वैतदर्शनस्य परिप्रेक्ष्ये जीवस्वरूपस्य विस्तृतविश्लेषणं कृतवन्तः।यस्य निष्कर्षाः दर्शनस्यास्य गहनतात्त्विकीमन्तदृष्टिं प्रकटयन्ति।

प्रायः सर्वे दार्शनिकानां मते 'आत्मा' जन्ममरणेभ्यो रहितोऽस्ति। 'आत्मायं' अजो, नित्यः, शाश्वतः, पुरातनश्चास्ति। शरीरे नष्टेऽपि 'अस्यात्मनः' नाशो न भवतीति।[1] अयञ्चात्मा अनादिकालादेव 'इश्वरेण' सह सम्बद्धोऽस्ति अथ च अयमेववर्तते ईश्वरस्य सनातनांशः, जीवस्तु ईश्वरादभिन्नोऽनेकश्च।[2] ईश्वर एव सर्वस्वतन्त्रः जीवत्वं परतन्त्रो वर्तते। जीवस्तु प्रकृतेरपि वर्तते भिन्नः, यतो हि साऽस्ति जड़ा जीवोऽस्ति नित्यः। इतोऽपि भेदाः वर्तन्ते जीवप्रकृतयोर्मध्ये यथा प्रकृतिरस्ति इश्वराधीना, प्रकृतेः सर्वाणि कार्याणि ईश्वरेण सञ्चालितानि सन्ति। प्रकृतिस्तु एकाकिनी सती किमपि न कर्तुं शक्नोति । जीवस्तु बुद्धियुक्तोऽस्ति सच शुभाशुभकर्मविधाने पूर्णतया स्वतन्त्रः वर्तते। जीवोऽपि कुत्रचित् परतन्त्रः दृश्यते यथा-स्वकृतकमजन्यफलभोगविषये जीवः परतन्त्र एव।

सर्वेषु दार्शनिकेषु मतेऽस्ति 'आत्मपदार्थः। किन्तु तस्य "आत्मनः" स्वरूपविषये सर्वेषां पर्याप्तमतभेदोऽस्ति।

न्यायदर्शने 'आत्मा' प्रतिशरीरे वर्तते भिन्नः, व्यापकत्वेन स 'आत्मा' नित्यःकथितः।[3]

अद्वैतवेदान्तस्य मते जीवो 'विभुः' निर्विशेषश्चाऽस्ति।"[4] विशिष्टाद्वैतदर्शने जीवस्य विषये कथितः यत् जीवोऽस्ति अणुरनेकः कर्ता भोक्ता ज्ञाता च।"[5] वेदान्तदेशिकानुसारेण 'जीवः' स्वयम्प्रकाशकः, ज्ञान स्वरूपः, अजड़ः च वर्तते।"[6]

तत्त्वमुक्ताकलापग्रन्थे वेदान्तदेशिकाचार्यैः उक्तं यत्- जीवोऽस्ति द्विविधः-

(1) निषेधात्मकं, (2) साकारात्मकः। निषोधात्मकप्रकारे तेन साधितं यत् जीवस्याऽस्ति शरीरेन्द्रिय-प्राणबुद्धिभ्यः पार्थक्यम्। सकारात्मकानुशीलने जीवोऽस्ति नित्यत्वाणुत्वस्वयं प्रकाशत्वकर्तृत्वभोक्तृत्व-कर्मस्वातन्त्र्यादीनि इति।

वेदान्तदेशिकाचार्यः अस्मिन् सन्दर्भ यामुनाचार्यमनुसरणं स्वीकारोति यत् जीवस्तु शरीरेन्द्रियि-मनप्राणबुद्धिभ्यः पृथग् अस्ति।"[7]

एतदर्थं तेन सर्वप्रथमं चार्वकदार्शनिकानां सिद्धान्तं निराकृतम्। यतो हि चार्वकानां मते 'शरीरमेव' आत्मा इति। यद्यप् चार्वाकोऽपि स्वमतसमर्थने नैकान् तर्कान् प्रस्तौति यथा- किण्वादिमादक द्रव्येषु मादक्ता स्वत एव आगच्छति तथैवशरीरेऽपि चैतन्यं स्वयमेवोत्पद्यते।[8] इमं सिद्धान्तं नास्ति उचितम् अतः वेदान्तदेशिकः कथयति यत् मादकपदार्थेषु मादकता तु पूर्वस्मात् एव वर्तते। नास्ति अस्योदाहरणस्य सम्बन्धः जीवेन। यतो हि जड़शरीरे चैतन्यस्याभावः एव विद्यते। एतस्मात् कारणाद् एषो दृष्टान्तः अनुपयुक्तः।

वेदान्तदेशिकस्तु 'आत्मा' अस्ति शरीराद् भिन्नः अस्मिन् सन्दर्भ निगद्यते यत्- इमौ मम हस्तौ इमौ मम पादौ च इति अनुभवात् आत्मास्ति शरीराद् भिन्नः। एव।"[9] लोकाचार्योऽपि अनेन प्रकारेणाऽपि अनेन प्रकारेणाऽपि 'आत्मपदार्थ' साध्नोति-उक्तञ्च 'इदं मम शरीरम्, इदं शरीरञ्चेति।[10]

यतीन्द्रमतदीपिकाकारोऽपि प्रमाणरूपेण प्रस्तुतवान् यत्- इदं मम शरीरमित्यनुभवाद् एव आत्माऽस्ति शरीराद् भिन्नपदार्थः।"[11]

अनेन प्रकारेण सिद्ध्यति यत् 'आत्मा' शरीराद् पृथगस्ति। यतो हि 'शरीरं क्षेत्रमस्ति, क्षेत्रज्ञोऽस्ति आत्मा च।"[12]

स्मृत्यानुसारेणापि अयमेव सिद्धान्तः उपस्थापितो यत् पुरुषोऽस्ति शिरोहस्तपादादियुक्तशरीराद् अतिरिक्तः। अतः जीवस्तु अल्पपरिमाणोऽणुश्चैतन्यो ज्ञाता भवेत् स एव।

अस्तु! अधुनाऽत्र सर्वेषां दार्शनिकानां मतप्रकव्य, ततः परं विशिष्टाद्वैतमते जीवस्वरूपस्य विमर्शः क्रियते।

**विशिष्टाद्वैतानुसारेण जीवलक्षणम्-** विशिष्टाद्वैतानुसारेण जीवस्य कृते लक्षणद्वयम्पस्थापितम्। तच्च सामान्यलक्षणमथ च विशेष लक्षणमिति । सामान्यलक्षणेषु प्रत्यक्त्वं, चेतनत्वम्, आत्मत्वं, कर्तृत्वं च उररिकृत-मस्ति।

विशेषलक्षणेषु आध्येत्वं, विधेयत्वं, शेषत्वानां च व्याख्यानं कृतम् अस्ति।"[13]

**जीवसामान्य लक्षणानिः-**

(1) प्रत्यक्त्वम् 'आत्मा' प्रत्यग् अस्ति। प्रतयक्त्वं नाम स्वस्मै स्वयमेव प्रकाशमानत्वम्।[14]

(2) चेतन्त्वम् आत्मा चेतनोऽस्ति । चेतनत्वं नाम ज्ञानाश्रयत्वम्।"[15]

(3) आत्मत्वम् आत्मत्वम् इति।"यत्किञ्चिद् शरीरे वर्तते आत्मसम्बन्धी-तत्त्वे तदेव[16]

(4) कर्तृत्वम् - आत्मा कर्त्ताऽस्ति। कर्त्तत्वमेव तस्य सामान्यधर्मः।"[17]

**जीवविशेषलक्षणानि-**

(1) आधेयत्वम् जीवोऽस्ति 'आर्धयः। तस्याधेयत्वं नाम ईश्वराश्रयत्वेन बोधविषयत्वम्।"

(2) विधेयत्वम् जीव एव विधेयः। जीवस्य विधेयत्वं नाम इश्वरेण नियन्त्रितं सकल-क्रियाकलापकत्त्वम्।"

(3) शेषत्वम् जीव एव 'शेषः'। शेषत्वं नाम ईश्वरस्योपयोगशालित्यम्।

तत्त्वत्रयकारेण तु जीवोऽस्ति अजडः, आनन्दस्वरूपः, नित्यः, अणुरव्यक्तः, चिन्त्यः, निरवयवः, निर्विकारः, ज्ञानाश्रयः, ईश्वर-नियम्यधार्यः शेषेश्च।"

अधुना विशिष्टाद्वैतवादीनां मतं प्रस्तौमि-

**जीवस्य स्वयंप्रकाशकत्वम्-**

'आत्मा' अस्ति स्वयंप्रकाशमान् यतोहि सः स्वप्रकाशाय अन्यस्य प्रकाशस्यापेक्षां न करोति। नित्योऽयमात्मा अस्माद् कारणाद् एव अयं तु सर्वदा प्रकाश्यते। अयञ्च सुप्तावस्थायामपि प्रकाशते यदा सर्वाणि ज्ञानसाधनानि, इन्द्रियाणि, मनश्चेतेषां सर्वेषामभावो भवति तस्मिन् समयेऽपि 'आत्मा' प्रकाशते एवञ्च स सुखमपि अनुभवति। लोकेऽपि दृष्टं शङ्कमः यत् देवदत्तः, उत्थाय वदति यत् -'सुखेनसुप्तम्' अयमेवास्याधारवाक्योऽस्ति ।

"आधेयत्वमाश्रित्वम्, विधेयत्वं नियाम्यत्वम्, शेषत्वंयथेष्टविनियो गार्हत्वम् तत्त्व,नियाम्यत्वं नामेश्वरबुद्ध्यधीनसकलव्यापारत्वम्। तत्रैव शेषेत्वं नाम चन्दनकुसुमताम्बूलादिवत्तस्येष्टविनोयगार्हत्वम्।

देहेन्द्रियमनः प्राणवद्धिभ्यो विलक्षणमजडमानन्दरूपं निम्मण्वव्यक्तम-चिन्त्यं निखयवं निर्विकार ज्ञानाश्रयं ईश्वरस्य नियाम्यं धार्यं शेषम्। तत्रैवपुरुषः बहदारण्यकोपनिषदः षष्ठेऽध्याये जनकः याज्ञवल्क्यम् अपृच्छत् यत् अयं ज्योतिर्मयः? याज्ञवल्क्यः जनकस्य जिज्ञासां साम्यति- यथोऽक्तम्-जागृतावस्थायाज्योतिः आदित्यस्वरूपेद् भवति परञ्च सुषुप्तावस्थायां तु तज्ज्योतिः 'आत्मनः' भवति।

आत्माऽस्ति 'प्रत्यगजडद्रव्यम्' इत्यस्ति वेदान्तदेशिकस्य मतम्। प्रत्यक्त्वं नाम स्वयंप्रकाशीलोऽयं जीवात्मा। अत्र जिज्ञासा जायते यत् प्रक्त्वमिदमात्मस्वरूपमस्ति उत्वा आत्मनः धर्मोऽयम्। एते द्वौ अपि प्रश्नौ सदोषौ वर्तेते। कारणमस्ति यत् प्रत्यक्त्वम् आत्मनश्चाऽस्ति एकपदार्थ एवञ्च प्रत्यक्त्वात्मनोः नास्ति विशेष्यविशेषण भावो न च धर्मिधर्मभावः। अभेदेऽपि एतयोः विशेष्यविशेषभावो मन्यते चेत् तर्हि ब्रह्मसूत्राभ्यां सहं विरोधो भवष्यिति।"[18] प्रथमे सूत्रे आदित्ये-आदित्यदेवे च परमात्मनि भेदं मतवा आदित्यान्तर्यामिन-मादितयदेवाद भिन्नं विवेचितमस्ति। अस्मिन् सूत्रे एव वर्णितयोरादित्यान्तर्यामिनोराश्रयाश्रयिभावो भेदेऽपि तयोः सङ्गति भविष्यति। अनन्तरमपरे सूत्रे प्रतिपादितं यत् जीवात्मनि परमात्मनः अंशो विद्यते एवञ्च जीवात्मपरमात्मनोः आश्रयाश्रय भावसम्बन्ध-मश्रित्य तयोः भेदाः प्रतिपादितमस्ति। अनेन प्रकारेण सिद्ध्यति यत् प्रत्यक्तवात्मस्वरूपयोः विशेष्यविशेषण भावात् प्रतयक्त्वस्य आत्मस्वरूपस्वीकारः उचितः नास्ति। तथा चैकत्वसंख्या विद्यते स भिन्नात्मस्वरूपादिति मन्यते।

**जीवात्मनः नित्यत्वम् -**

जीवोऽस्ति नित्यः अयं सिद्धान्तोऽपि उपनिषदि प्रतिपादितमस्ति। कठोपनिषदि जोवस्य कृतं अजन्मा, नित्यः चेतनः अविनाशी चोक्तम।"[19]

न्यायवैशोषिकानां मतेऽपि जीवो नित्य एवेति। वेदान्तदर्शनस्यापि मतमिदमेव वर्तते। परञ्च वेदान्तदेशिकाचार्येण तत्त्वमुक्ताकलापग्रन्थे 'ब्रह्मदत्तदार्शनिकस्य' चर्चा कृता तेन आचार्यब्रह्मदत्तदार्शनिकेन 'जीवोऽस्ति अनित्यः' इत्यस्मिन् विषये उक्तं यत् - एकं ब्रहौव नित्यं।[20] ब्रह्मदत्तदार्शनिकानुसारेण जीवः ब्रह्मणा उत्पद्यते एतस्मात् कारणात् जीवोऽनित्यः। स्वोपस्थापितसिद्धान्ताय नैकानि वैदिकमन्त्राणि अपि उद्धृतानि। छान्दोग्योपनिषदः "प्रारम्भे केवलमेकमद्वितीयं सदेवासीत" इति मन्त्रं प्रस्तुतवान्। तथा च यजुर्वेदस्यापि मन्त्रमुद्धृतवान् मन्त्रार्थोऽस्ति 'यज्जायते तद् विनश्यति' तर्हि कथमयं जीवो नित्यमिति। भवितुं शक्नोति । अस्याक्षेपस्य विषये वेदान्तदेशिकः नैकानि प्रमाणानि प्रस्तुतवान्। वेदान्तदेशिकः जीवस्यानित्यतां न स्वीकृतवान्।

इत्थं विशिष्टाद्वैमतानुसारेण आत्मा तु परब्रह्मण एव एकांशो यर्थाथाद्धत इत्यादि अयमेव आत्मा बुद्धिसम्पन्नः, चैतन्योऽखण्डः,

अपरिवर्तनशीलः, अदृस्याणुरुपकः चाऽस्ति। अयश्चात्मा देहात् भिन्नो वर्तते यथा-

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।'[21]

विशिष्टाद्वैतानुसारेण जीवस्य त्रयो भेदास्सन्ति। ते च

(1) बद्धजीवः

(2) मुक्तजीवः

(3) नित्यजीव इति।

यथोक्तम् - सो जीवस्त्रिविधः बद्धमतुक्तनित्यभेदात्।[22]

बद्धजीवः

देवशरीराणि

मनुष्यशरीराणि

तिर्यक्शरीराणि

स्थावरशरीराणि

जीवः

स्वेदजाः

जरायुजाः

उङ्किजाः

अण्डजाः

केचनाऽत्र शास्त्रपरतन्त्रजीवाः अपि वर्तन्ते। तेषां मुख्यरूपेण विभागो निम्नरूपेण कर्तुं शक्यते-

जीवः

बुभुक्षुजीवः

मुमुक्षुजीवः

एवं ये खलु मुमुक्षुजीवो वर्तन्ते, ते एव कैवल्यमापनुवन्ति। इति जीवस्वरुपम्।

**उपसंहारः**

विशिष्टाद्वैतवेदान्तः एकादशशताब्द्याः महता दार्शनिकेन रामानुजाचार्येण प्रतिपादिता भारतीयदर्शनस्यैका महत्त्वपूर्णा शाखा वर्तते या ब्रह्मजीवजगताम्मध्ये विशिष्टाद्वैतसिद्धान्तं स्थापयति। अस्मिन् शोधपत्रे वयं विशिष्टाद्वैतदर्शनस्य परिप्रेक्ष्ये जीवस्वरूपस्य विस्तृत-विश्लेषणं कृतवन्तः। यस्य निष्कर्षाः दर्शनस्यास्य गहनतात्त्विकीमन्तदृष्टिं प्रकटयन्ति।

विशिष्टाद्वैतदर्शनं जीवं ब्रह्मणः वास्तविकः शाश्वतश्चांशः मन्यते यस्तु अणुस्वरूपः (अतिसूक्ष्मः) ज्ञानस्वरूपः (चेतनासारः) कर्ता च (सीमितार्थेषु) वर्तते। जीवः ब्रह्मणि पूर्णतया आश्रितोऽस्ति तथैव यथा शरीरः आत्मनि आश्रितो भवति अतः ब्रह्म शरीरी जीवश्च शरीररूपे वर्णितोऽस्ति। अयं शरीरशरीरिभावः विशिष्टाद्वैतस्य मूलसिद्धान्तेष्वैकोस्ति यः जीवब्रह्मणोः अभिन्नः परन्तु भिन्नसम्बन्धं स्थापयति। जीवः स्वज्ञानात्मकक्रियात्मकक्षमतानां कारणाद् भोक्ताऽपि वर्तते यः स्वकर्मणां फलानि सुखदुःखरूपे अनुभवति।

अस्माकं विश्लेषणेन सुस्पष्टं भवति यत् विशिष्टाद्वैते जीवब्रह्मणोर्मिथः सम्बन्धः भेदाभेदयोसमन्वयोऽस्ति। जीवः ब्रह्मणेः तात्त्विकरूपेण भिन्नोऽस्ति यतोहि तस्य स्वतन्त्रव्यक्तित्वः सीमीताश्च क्षमताः सन्ति परञ्च सः ब्रह्मणः अभिन्नोऽपि वर्तते यतोहि सः ब्रह्मणः एव अंशोऽस्ति पूर्णतया च तस्मिन् आश्रितोऽस्ति। अयं भेदाभेदसिद्धान्तः शंकरस्य अद्वैतवेदान्तस्याद्वैतवादात् भिन्नोऽस्ति जीवस्य च वास्तविकतां ब्रह्मणि च तस्याश्रिततां उभये स्वीकरोति।

निष्कर्षतः विशिष्टाद्वैतदर्शनं जीवस्वरूपस्य समृद्धां तार्किकां च व्याख्यां प्रस्तौति। इदं दर्शनं जीवस्य स्वातन्त्र्यं कार्यभारञ्च स्वीकुर्वन्नपि तस्य परमाश्रिततां ब्रह्मणि स्थापयति भक्तिञ्च मोक्षप्राप्तेः सर्वोत्कृष्टमार्गं कथयति। इदं दृष्टिकोणन्नकेवलं तात्त्विकगहनता प्रददाति अपि तु आध्यात्मिकसाधनायै एकां स्पष्टदिशामपि प्रददाति।

**पाद टिप्पणी –**

1 न जायते म्रियते वा कदचिद् नायं भूत्वा भविता वा ना भूयः।
अजो नित्यः शाश्वतोह्वयं पुराणो न हन्यतेहन्यमाने शरीरे। गी. पृ. 2/20

2 ममैवांशो जीवलोके जीवभूतः सनातनः। गी. पृ. 15/7

3 जीवात्मा प्रतिशरीरं भिन्नोविभुर्नितयश्च। तर्क. सं. पृ. 17

4 मायामात्रमिदं द्वैतमद्वैतं परमार्थतः। आगम. पृ. 17

5 वोढा कर्ता च भोक्ता दृढत्मवगमितः प्रत्यगर्थः प्रमाणैः तत्त्व. 2-8

6 स्वस्मै भासमान प्रत्यक। सर्वार्थ 1-6

7 देहेन्द्रियमनः प्राणधीभ्योऽन्योन्यसाधनः। आत्म. पृ. ।

8 किण्वादिनां संसर्गविशेषो मदशक्तिः। सर्वार्थ- 2-1

9 यो मे हस्तादिष्वर्मेत्यवयनिवहात् भिन्नस्स एकः। तत्त्व. 2-1

10 आत्मस्स्वरूपं कथं देहादिविलक्षणामिति चेद् देहादीनां
मम देहादिकमित्यात्मनपृथगुपलभ्यमानत्वात्। तत्त्वत्र्य-पृ. 6

11 स च देहेन्द्रियमनः प्राणधीभ्योविलक्षणः।
यथा मम शरीरमिति प्रतीत्या देहाद्व्यावृतः। यती. पृ. 161

12 (क) इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते। गोता -13-
(ख) क्षेत्रनं चापि मां विद्धि सर्वचक्षेत्रेषु भारत। तत्रैव

13 प्रत्यवतचेतनत्वात्मत्वकर्तुत्वादीनि ईश्वर जीव साधारणलक्षणानि।
यती. पृ. 159

14 प्रत्यक्त्वं नाम स्वस्मै स्वयमेव भासमानत्वम् । तत्रैव

15 वेतनत्वं नाम ज्ञानाश्रयतवम्। तत्रैव

16 आत्मत्वं शरीरं प्रति समबन्धित्वम् । तत्रैव

17 कर्तुत्वं सङ्कल्पज्ञानाश्रयत्वम्। तत्रैव

18 भेदव्यपदेशाच्चायम् ब्र. सू. 1/1217

19 नित्यानित्यानाश्चेतनश्चेतनानामेको बहुना यो विदधति कामान्।
कठ. 2-5-13

20 अजो नित्यः शाश्वतोऽयं पुराणः। कठ-1-2-28

21 गीता - 13-1

22 पती - पृ. 186